विचित्रवीर्य्यस्य दिवं गतस्य
पितुः स राज्यं प्रतिपद्य बाल्ये।
पुरीमयोध्यां धृतराष्ट्रभद्रां
सहस्तिशोभां सुखमध्युवास ॥ ५१ ॥

वाणश्रेणिकरालकार्म्मकभृता येन घ्नता विद्विषः
क्ष्माभारक्षयजृम्भितोरगपतिप्रारब्धनानाशिषा।

वान्। वसतेरुपान्वध्याङ्वस इत्याधारस्य कर्म्मत्वम्। किम्भूतस्य विचित्र-माश्चर्य्यरूपं वीर्य्यं बलं यस्य स तथा तस्य पुरीं किम्भूतां धृतम् अवधृतं निश्चितं राष्ट्रस्य राज्यस्य भद्रं मङ्गलं यस्यां तादृशीं राज-धानीरूपामित्यर्थः। तथा हस्तिशोभां हस्तिभिः सम्पादितश्रियम्।

पक्षे पाण्डुर्दिवं गतस्य विचित्रवीर्य्यस्य विचित्रवीर्य्यनामकस्य पितुः चेचिणोराज्यं बाल्ये प्रतिपद्य सहस्तिशोभां हस्तीतिशब्दकृत शोभया सह वर्त्तमानां हस्तिपदचिह्नितां हस्तिनां पुरीं सुखमध्यु-वास किम्भूताम् अयोध्याम् अन्यैरयोधनीयां यद्वा अविद्यमाना योध्या योधनीयाः शत्रवो यत्र तादृशीं शत्रुरहितामित्यर्थः। तथा धृतराष्ट्रः पाण्डोर्ज्येष्ठभ्राता तेन भद्रां कुशलिनीम्। सहस्तिशोभा-मिति हस्तिनामकः कश्चित् पौरवआसीत् येन स्वनाम्ना हस्तिना पुरं स्थापितं तेन कृतया शोभया सह वर्त्तमानामिति वा ॥ ५१ ॥

अविशेषेण द्वावपि श्लोकद्वयेन विशिनष्टि

वाणेति। येन दशरथेन पक्षे पाण्डुना च त्रिलोकवलयैः पालकत्वसम्बन्धेन त्रिभुवनमण्डलैरथ च वलयरूपैस्त्रिलोकैर्दोर्म्मण्डलं बाहुप्रकाण्डं मण्डितं भूषितम् अन्योऽपि वलयेन दोर्म्मण्डलं मण्ड यति किम्भूतेन वाणश्रेण्या शरपङ्क्त्या करालं दन्तुरं भीषणं वा यत् कार्म्मुकं धनुस्तद्बिभर्त्ति धारयतीति तादृशेन सता विद्विषः शत्रून् घ्नता नाशयता अतएव क्ष्मायाः पृथिव्या यः शत्रुकृतोभारः

पूर्व्वोर्व्वीपतिकल्पिताभयचतुर्द्दिक्पालवर्जं निजा
माज्ञां स्थापयता त्रिलोकवलयैर्दोर्म्मण्डलं मण्डितम्
॥५२॥

विक्षिप्तस्य प्रतिन्दपकुलं राजशब्दस्य लोके
तेनात्मानं नियतविषयं कुर्व्वता तेजसश्च ।

गुरुत्वं तस्य च्छयेणापगमेन जृम्भितः सुखोदयात् स्फीताय उरगपतिः शेषनागस्तेन प्रारब्धाः प्रस्तुता नाना जयजीवेत्यादिबहुप्रकारा आशिषोयस्य स तथा तेन तथा पूर्व्वे स्वपूर्व्वपुरुषा ये उर्व्वीपतयो राजानस्तैः कल्पितम् अनुग्रहेण दत्तम् अभयं येभ्यस्ते च चतुर्द्दिक् पाला इन्द्रादयस्ते चेति द्वन्द्वः तद्वर्ज्जं तान् वर्ज्जयित्वा निजाम् आज्ञां स्थापयता निवेशयता यद्वा पूर्व्वोर्व्वीपतिकल्पिताभयेति चतुर्द्दिक्-पालानां विशेषणम् इन्द्रादिष्वपि निजाज्ञास्थापने तस्य सामर्थ्य-मासीत् किन्तु प्राचीनैस्तन्न कृतमिति मत्वा तेनापि न कृतमिति भावः । क्वचित्त्रिलोकवलये इति सप्तम्यन्तः पाठः तत्र त्रिलोकवलये निजामाज्ञां स्थापयतेत्यन्वयः दोर्म्मण्डलमित्यत्र भूमण्डलमिति क्वचित् पाठः । अत्र द्वयोरपि पाण्डुदशरथयोः प्राकरणिकतया एकधर्म्माभि सम्बन्धात्तुल्ययोगितालङ्कारः । किञ्चालौकिककृत्यवर्णनादुदात्तालङ्कारोऽपि लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते इति लक्षणात् । करालोदन्तुरे तुङ्गे भीषणे चाभिधेयवदिति मेदिनी ॥ ५२ ॥

विक्षिप्तस्येति । तेन राज्ञा दशरथेन पाण्डुना च तथा घर्म्म भासा च सूर्य्येण च तुल्यं युगपत् सर्व्वेषां पृथ्वीधराणां राज्ञाम् अथ च पर्व्वतानां शिरसि मस्तके अथ च शिखरे पादन्यासस्चरणा-र्पणम् अथ च किरणपातोरचितः कृतः तुल्यं समानमिति वा यथा सूर्य्येण सर्व्वे पर्व्वताः क्रमेण किरणपातेनाक्रम्यन्ते तथा सर्व्वे न्टपा स्तेन क्रमेण जिताइत्यर्थः शिरसि किम्भूते छत्रस्य राजचिह्नभूत सितातपत्रस्य अथ च आवरणमात्रस्य या च्छाया तस्या अपगमेना-

मत्वा मृगं मार्गणलक्ष्यभूत
मनग्रजन्मानमृषिं चकार ॥ ५९ ॥
तपस्विनश्छन्नतनोः शरेण
विभिन्नमूर्त्तेर्जनकान्महाधेः ।

ज्जले कुम्भं तदा शब्दोऽभवन्महान्। गजः पिबति पानीयमिति मत्वा महानिशि । वाणं धनुषि सन्धाय शब्दभेदिनमाक्षिपमिति। मृगः पशावस्त्रभेदे तुरङ्गे च मतङ्गजइति विश्वः। अस्मिन् पक्षे तमसोपकण्ठे इत्यत्र तमसाया नदीविशेषस्य उपकण्ठे समीपे इति केषाञ्चिद्व्याख्यानं चिन्त्यं सरयूमन्वगां नदीमिति वाल्मीक्युक्तेः सरयूतीरएव तथावर्णनस्यौचित्यात् सरयूतमसयोश्च वस्तुतोभेदात्।

पक्षे तमसा मोहेन गाढ़बुद्धिराक्रान्तमतिरतएव गतभीर्निषिद्धेऽपि कामासक्तपशुमारणे निर्भयः सपाण्डुः उपकण्ठे विवर्त्तमानं तिष्ठन्तम् अभीकं मृगरूपिण्यां स्त्रियां मृगरूपं धृत्वा कामासक्तम् अनग्रजन्मानं नास्ति अग्रजन्मा ब्राह्मणो यस्मात् तादृशं ब्राह्मणश्रेष्ठमित्यर्थः ऋषिं तपस्वितनयं मृगं हरिणं मत्वा मार्गणलक्ष्यभूतं चकार मृगरूपेण रममाणं कञ्चिन्मुनितनयं वाणेन विव्याधेत्यर्थः। तथाच महाभारतं राजा पाण्डुर्म्महारण्ये मृगव्यालनिषेविते। चरन् मैथुनधर्म्मस्थं ददर्श मृगयूथपम्। ततस्तांश्च मृगीं तञ्च रुक्मपुङ्खैः सुपत्रिभिः। निर्बिभेद शरैस्तीक्ष्णैः पाण्डुः पञ्चभिराशुगैः। सच राजन् महातेजा ऋषिपुत्रस्तपोधनः। भार्य्यया सह तेजस्वी मृगरूपेण सङ्गतः। संसक्तश्च तया मृग्या मानुषीमीरयन् गिरम्। क्षणेन पतितोभूमौ विललापाकुलेन्द्रियइति। अभीकः कामुके क्रूरे निर्भये त्रिषु ना कवाविति मेदिनी॥ ५९॥

तपस्विनइति। प्रिया हृद्या या अनुवृत्तिरनुनयस्तत्र कुशलोऽपि निपुणोऽपि अपराधमार्ज्जनाय अतितरामनुनयं कुर्व्वन्नपीत्यर्थः दशरथः शरेण वाणेन विभिन्ना विदारिता मूर्त्तिस्तनुर्यस्य तादृशस्य तपस्विनस्तापसस्य तस्य जनकात् पितुरन्धमुनेः सकाशात् शापम् अवाप

शापं सुतापायनिबद्धमृत्यु
प्रियानुवृत्तौ कुशलोऽप्यवाप ॥ ६० ॥
विषद्रुमस्य व्यसनाह्वयस्य
फलं स लब्ध्वा सहसा निवृत्तः।
कान्तोपभोगेषु पराङ्मुखात्मा
निनाय कालं निरपत्यदुःखी ॥ ६१ ॥

प्राप्तवान् शापं कीदृशं सुतापायनिबद्धमृत्युं सुतस्य पुत्रस्य अपायेन विश्लेषेण निबद्धो नियतो मृत्युर्यत्र तादृशं त्वमपि सुतवियोगेन अहमिव नियतं मृत्युं प्राप्स्यसीत्येवंरूपमित्यर्थः जनकात् किम्भूतात् छन्नतनोः रहःस्थितमूर्त्तेः तथा महाधेः पुत्रमरणश्रवणात् महान् आधिर्म्मानसव्यथा यस्य तादृशात्। अयमर्थः शरविभिन्नमूर्त्तिं तपस्विनं परित्यज्य तदुक्त्या तत्पितरमन्धमुनिमुपगम्य पिपासुं तं जलेन सन्तर्प्य तावत् स्वदुश्चरितमुक्तवान् तत् श्रुत्वातिदुःखान्मुमूर्षुरन्धमुनिस्त्वमपि सुतविश्लेषदुःखेन मरिष्यसीति शापं दशरथाय दत्तवानिति।

पक्षे कुशलोऽपि कार्य्याकार्य्यविवेचकोऽपि पाण्डुर्दुरदृष्टवशात् सुतापाय शोभनतापाय अतिपीड़ार्थं तपस्विनः शापम् अवाप शापं कीदृशं प्रियानुवृत्तौ सम्भोगार्थं प्रियानुसरणे निबद्धमृत्युं नियतमरणरूपं किम्भूतात् तपस्विनः छन्नतनोर्मृगरूपेणावच्छन्नदेहात् तथा शरेण विभिन्नमूर्त्तेः तथा महाधेर्महत्यामानसव्यथायाजनकात् सम्पादकात् ॥ ६० ॥

विषेति। निरपत्येन अपत्याभावेन दुःखी खिद्यमानः स दशरथः कान्तामनोज्ञाउपभोगाविषयास्तेषु पराङ्मुखात्मा निवृत्तमनाः सन् कालं निनाय निरपत्यदुःखितया विषयरसमवजानन्यमानोऽवृथा कालक्षेपञ्चकारेत्यर्थः। किम्भूतः सहसा हठात् व्यसनाह्वयस्य मृगया रूपव्यसननामकस्य विषद्रुमस्य विषवृक्षस्य फलम् अभिशापरूपं लब्ध्वा निवृत्तः मृगयाव्यापारात् पराङ्मुखः।

ततोमुनिव्याहृतमन्त्रयुक्त्या
तदीयपत्नीपरिचर्य्यया च ।
भक्त्योपसत्त्या च नृपस्य जज्ञे
पिण्डोपलब्धिर्व्विबुधप्रसादात् ॥ ६५ ॥
स्फुरदृष्यशृङ्गविततान्यथान्वहं
सवनान्तराण्यधिगतोमहीपतिः ।

ततइति । ततस्तदनन्तरं मुनिना ऋष्यशृङ्गेण व्याहृताउक्तायेमन्त्राः पुत्रेष्टिविषयिकाऋचस्तेषां युक्त्या प्रयोगेण तथा तदीयपत्नीनां दशरथस्त्रीणां कौशल्यादीनां या परिचर्य्या देवानां मुनेर्व्वा सेवा तया च तथा भक्त्यापत्त्या भक्तिपूर्व्विकया तदेकनिष्ठतया च विबुधानां देवानां प्रसादात् नृपस्य दशरथस्य पिण्डोपलब्धिः पुत्रोत्पत्त्या पिण्डनिश्चयो जज्ञे जाता । तदीयपत्नी ऋष्यशृङ्गपत्नी दशरथसुता शान्ता तस्याः परिचर्य्ययाचेति केचित् ।

पक्षे ततोनृपस्य पाण्डोर्व्विबुधानां धर्म्मादीनां प्रसादात् क्षेत्रज पुत्रोत्पत्त्या पिण्डोपलब्धिर्जज्ञे कथंभूतइत्याह मुनिना दुर्व्वाससा व्याहृतः कुन्त्यै दत्तोयोऽभीष्टदेवाह्वानक्षमन्त्रस्तद्रूपा या युक्तिस्तया तथा तदीयपत्नेयाः कुन्तीमाद्र्योः परिचर्य्यया धर्म्मादीनामुपासनया तथा भक्त्या भक्तिद्वारा या उपसत्तिः कुन्तीमाद्र्योर्यथायथं धर्म्मादिषु सङ्गस्तया च । दुर्व्वासोदत्तमन्त्रेण कुन्त्या क्रमेण धर्म्मपवनेन्द्राणामाकारणा कृता तेन चास्यायुधिष्ठिरभीमसेनार्ज्जुननामानस्त्रयः पुत्त्रा जाताः तदनु माद्र्या च तथैव अश्विनावाकारितौ ततश्च तस्याअपि द्वौ पुत्रौ नकुलसहदेवनामानौ जातावित्यर्थः ॥ ६५ ॥

उक्तमर्थं व्याकरोति स्फुरदिति । अथानन्तरं महीपतिर्दशरथः अन्वहं प्रतिदिनं स्फुरता तपःप्रभावाद्दीप्यमानेन ऋष्यशृङ्गेण मुनिना विततानि विहितानि सवनान्तराणि यज्ञभेदान् यज्ञविशेषजनिताष्टस्थानीत्यर्थः अधिगतः प्राप्तः सन् चतुरोऽपि न केवलमेकं चतुःसंख्यकानपि तनयान् रामलक्ष्मणभरतशत्रुघ्नरूपान् पुत्रानवाप

सद्यः सानुचरं निशाचरपतिं भीमः सुबाहुं रणे
दोर्वीर्य्येण जघान वीरपदवीमारुह्य घोराम्बकम् ॥९१

भूचरद्विजगणाशनं द्विषं
खेचरद्विजगणाशनं तदा ।
तं विधाय कुलमग्रजन्मनां
राक्षसक्षयकरोररक्ष सः ॥ ९२॥

भयङ्करः निशाचरपतिं किम्भूतं मारीचस्य मारीचनामकस्य राक्षसस्य इष्टं भ्रातृत्वात् प्रियं तथा सिद्धाश्रमस्थायिनां तपोवनवासिनां मुनीनामनिष्टकारिणम् अपकारकं तथा घोरे भयङ्करे अम्बके चक्षुषी यस्य स तथा तम् । दैवदीपस्तु लोचनम् अम्बकमिति पुरुषोत्तमः ।

पक्षे असौ भीमोभीमसेनः गुरोः कुन्त्या आज्ञया रणे घोरां भयानकां वीरपदवीमारुह्य दोर्व्वीर्य्येण बाहुबलेनैव नतु वाणादिना बकं बकनामकं निशाचरपतिं सद्योजघान किम्भूतं मारी जनक्षयस्तत्र चेष्टा यस्य स तथा तं तथा सानुषु पर्व्वतगुहासु चरतीति सानुचरस्तं तथा सुबाहुं दीर्घभुजम् अन्यत् समानम् । मारी चण्ड्यां जनक्षये इति मेदिनी । शार्दूलविक्रीड़ितं वृत्तम् ॥ ९१ ॥

भूचरेति । सरामः भुवि पृथिव्यां चरन्तीति भूचराये द्विजगणा ब्राह्मणगणास्तानश्नातीति तादृशं द्विषं शत्रुं तं सुबाहुं खेचरा अन्तरिक्षचारिणोये द्विजगणाः पक्षिगणास्तेषामशनं भक्ष्यं विधाय कृत्वा अग्रजन्मनां ब्राह्मणानां कुलं समूहं ररक्ष रक्षितवान् किम्भूतः राक्षसानां क्षयं नाशं करोतीति तादृशः ।

पक्षे तं बकं कुलं वंशं सभीमः अन्यत् समानम् । दन्तविप्राण्डजा द्विजाइत्यमरः । रथोद्धतावृत्तमिदम् । रान्नराविह रथोद्धता लगाविति लक्षणात् ॥ ९२ ॥

दूरात् केचन केचिदीक्षणपथादन्ये करास्पन्दना
देके धारणतः सगर्व्वमितरे मुष्टौ तलास्फालनात्।
आनम्रीकरणात्परे कतिपये जीवाटनीघट्टनात्
कोदण्डेनयशालिनीवन्टपतौबन्ध्यश्रमास्तेऽभवन्॥२४

मद्राङ्गचेदिमगधेशपुरःसरेषु
क्षत्त्राय राजसु जलं मनसा ददत्सु।

विशेषतः पूर्व्वोक्तमेवाह

दूरादिति। ते राजानः नयशालिनि नीतिज्ञे न्टपताविव कोदण्डे पणीभूते तस्मिन् धनुषि बन्ध्यो निष्फलः श्रमः प्रयासो येषां तादृशा अभवन् यथा नयशालिनि न्टपतौ अन्ये न्टपतयो विफल श्रमा भवन्ति तथेत्यर्थः कथमित्याह केचन राजानो दूरात् धनुरदृष्ट्वै-वेत्यर्थः निवृत्ता इतिशेषः एवं सर्व्वत्र तथा केचित् ईक्षणपथात् दर्शनमार्गात् धनुर्दृष्ट्वेत्यर्थः तथा अन्ये करास्पन्दनात् कराभ्यां स्पर्श-नात् दृष्ट्वा गत्वा कराभ्यां स्पृष्ट्वा च अशक्यत्वनिश्चयान्निवृत्ताइत्यर्थः एके सगर्व्वं साहङ्कारं यथा तथा धारणतः धनुर्धृत्वा अतिगौरव निश्चयान्निवृत्ताइत्यर्थः तथा इतरे मुष्टौ तलास्फालनात् धनुर्द्धारणार्थं मुष्टौ क्रियमाणायां तलेन करतलेन यत् आस्फालनम् आपीड़नं तस्मात् तथा परे आनम्रीकरणात् धनुरीषन्नमयित्वेत्यर्थः तथा कति-पये जीवा मौर्व्वी अटनी धनुष्कोटिस्तयोर्घट्टनात् योजनात् धनु-ष्कोटौ मौर्व्वीं योजयित्वेत्यर्थः। उभयत्र समानम् उपमेयं श्रौती शार्दूलविक्रीड़ितं वृत्तम्॥२४॥

मद्राङ्गेति। मद्राङ्गचेदिमगधानां देशविशेषाणाम् ईशाः स्वा-मिनो मद्राङ्गचेदिमगधेशास्ते पुरःसरा अग्रगण्या येषां ते तथा तेषु तत्प्रभृतिषु राजसु पणस्यानिर्व्वाहात् मृतकल्पाय क्षत्त्राय क्षत्त्रिय जातये क्षत्त्रियधर्म्माय वा मनसा जलं ददत्सु तर्पणं कुर्व्वत्सु सत्सु धिग्वयं क्षत्त्रियाः ये एतद्धनुर्नमयितुमपि न शक्नुम इत्यात्मानं निन्द-

तेषां विक्रमवातवेल्लितनिजक्रोधानलप्रेङ्खितः
साक्षात्कालइवोद्यतोभृगुपतिर्दुर्य्योधनोऽभ्यागतः।३४
सदुराणममानमय्य चापं
रणकण्डूतिमखण्डयत्ततोऽस्य।

उद्यतः कालोयमइव दुर्य्योधनः दुःखेन योधनीयः। सुदुरीषज्झः कर्म्मभावयोर्दृशादेरिति कर्म्मणि डनः। भृगुपतिर्जामदग्न्यः अभ्यागतः तेषामभिमुखमागच्छत्।

पक्षे तेषाम् अर्ज्जुनादीनां भृगुः शिवः पतिः प्रभुरुपास्योयस्य स दुर्य्योधनोराजा अभ्यागतः भृगूणां पर्व्वतप्रपातानां पतिः शल्यः तस्य पर्व्वतीयन्टपत्वात् तथा दुर्य्योधनस्येति वा। ततः कर्णो महातेजा जिष्णुं प्रति ययौ रणे। भीमसेनं ययौ शल्योमद्राणामीश्वरो बली। दुर्य्योधनादयस्त्वान्ये ब्राह्मणैः सह सङ्गताइति भारतोक्तः। अन्यत् समानम्। भृगुपतिः शुक्रइव प्रयाणे पुरःशुक्रस्यामङ्गलपिशुनतया वर्ज्जनीयत्वात्तदंशे साम्यम्। पुरःशुक्रं प्रतिबुधं प्रत्यङ्गारकमेव च। अपि शक्रसमोराजा हतसैन्योनिवर्त्ततइति शास्त्रादिति केचित्। अथ भृगुः सानौ जमदग्निप्रपातयोः। शुक्रे रुद्रे चेति हेमचन्द्रः। यद्यपि पाणिग्रहणात् प्रागेव दुर्य्योधनाद्याक्रमणं भारते वर्णितं तथापि रामायणानुरोधात् किञ्चिदन्यथावर्णनं न दूषणावहमिति ध्येयम्। अत्र रूपककाव्यलिङ्गोत्प्रेक्षाणां सङ्कीर्णता। शार्दूल विक्रीड़ितं वृत्तम्॥ ३४॥

सइति। ततोऽनन्तरं कौशिकनन्दनो विश्वामित्रसन्तोषणः शिष्यत्वादिति भावः नृपतेर्दशरथस्य कुमारः स रामः अस्य परशुरामस्य दुराणममन्यैरानमयितुमशक्यं चापमानमय्य तत्र वाणं सन्धायेत्यपि पूरणीयं परलोकजिगीषयैव शाकं परलोकगमनव्यवसायेन सहैव अस्य रणकण्डूतिं युद्धौत्सुक्यम् अखण्डयत् निवारितवान् रणौत्सुक्यम् अखण्डयत् स्वर्गमार्गञ्चारुणदित्यर्थः काकाक्षिन्यायात् अस्येति चाप रणकण्डूत्योः सम्बद्ध्यते।

निजविक्रमनिर्धूतपर्ज्जन्यशरसन्ततिः।
स पन्नगांस्तार्क्ष्यइव द्रावयामास दानवान्॥४॥
दिवः स कृत्वामयशान्तिमेवं
प्रणीतगुप्तिर्हरिणा कृतश्रीः।

निजेति। निजविक्रमेण स्वपराक्रमेण निर्धूता विफलीकृता पर्ज्जन्यस्य इन्द्रस्य शरसन्ततिर्येन सः इन्द्रशरकार्य्यं दानवविद्रावणं स्वयमेव कुर्व्वन्नित्यर्थः स दशरथः पन्नगान् नागान् तार्क्ष्यो गरुड़ इव दानवान् असुरान् द्रावयामास ताड़ितवान्। पर्ज्जन्यौ रस-दब्देन्द्रावित्यमरः। निजविक्रमेण निर्धूता पर्ज्जन्यइव ध्वनदम्बुद वृष्टिरिव शरसन्ततिरसुरमुक्तवाणपरम्परा येन स इति केचित्।

पक्षे निजविक्रमेण निर्धूताः पर्ज्जन्या इन्द्रप्रेरितध्वनन्मेघा यया तादृशी शरसन्ततिर्यस्य सोऽर्ज्जुनः तार्क्ष्योगरुड़इव तार्क्ष्यवदति प्रतापीत्यर्थः सपन्नगान् दानवान् पन्नगान् दानवांश्चेत्यर्थः द्रावयामास वह्नौ गालयामास इन्द्रप्रेरितान् मेघान् वाणवर्षैर्निराकृत्य पलाय-मानान् पन्नगादीन् वाणेनावरुध्य वह्नौ दाहयामासेत्यर्थः। उभय त्राप्युपमालङ्कारः॥४॥

दिवइति। एवं पूर्व्वोक्तप्रकारेण दिवः स्वर्गस्य आमयशान्तिम् उपद्रवनिवारणं कृत्वा प्रणीता विहिता गुप्ती रक्षा येन सः तथा हरिणा इन्द्रेण परितुष्टेन सतेति शेषः कृता पुरस्कारदानेन श्रीः शोभा यस्य सः तथा रामायाः सहगतायाः कैकय्या आननालोकने लम्पटः साभिलाषः आत्मा यस्य स युद्धश्रमापनयनाय शुश्रूषमाणां कैकयीं सानुरागं पश्यन्नित्यर्थः स दशरथः पुनर्निजमेवराष्ट्रम् अयो-ध्याराज्यं प्रपेदे प्राप। केचित्तु रामस्याननालोकनलम्पटात्मेत्याहु स्तन्न मनोरमम् असुरसंग्रामात् परमेव रामाद्युत्पत्तेः।

पक्षे एवं पूर्व्वोक्तरीत्या प्रणीता कृता गुप्तिः खाण्डवं दहतो वह्नेः रक्षा येन सः तथा हरिणा कृष्णेन कृता श्रीर्यस्य सः कृष्णसहित

पुनः प्रपेदे निजमेव राष्ट्रं
रामाननालोकनलम्पटात्मा ॥ ५ ॥
स्वर्गमार्गस्य मित्रं या सा भर्तृवरयोगतः।
तुतोष वनिता भक्तिविनमत्तनुमध्यमा ॥ ६ ॥
महार्घमुक्तामयसंविधान
प्रकामरम्या मणिदारुचित्रा।

इत्यर्थः हरिणा इन्द्रेण वह्निना वा कृतश्रीरिति वा तादृशः सोऽर्ज्जुनः मयस्य मयनामकदानवस्य शान्तिं कृत्वा शरणागतं मयदानवं वह्निदाहाद्रक्षित्वेत्यर्थः रामायाः द्रौपद्याः सुभद्रायाश्च आननालोकने लम्पट आत्मा यस्य सः रामाननं द्रष्टुमुत्कण्ठमानः सन् इत्यर्थः दिवः स्वर्गात् स्वर्गीयवनात् खाण्डवादित्यर्थः पुनर्निजमेव राष्ट्रं इन्द्रप्रस्थं प्रपेदे ॥ ५ ॥

स्वर्गेति। या स्वर्गमार्गस्य स्वर्गमार्गगमनस्य मरणस्येत्यर्थः मित्रं हेतुः रामवनवासद्वारा तात्कालिकमरणजनिकेत्यर्थः सा मध्यमा वनिता पत्नी कैकेयी भर्त्तुः स्वामिनः सकाशात् वरयोरभीप्सितयोर्योगतो लाभात्। वरो जामातरि वृतौ देवतादेरभीप्सिते इति मेदिनी। सेवासन्तोषिताद्राज्ञोवरद्वयं प्राप्येत्यर्थः भक्त्या अनुरागेण विनमन्ती प्रह्वीभवन्ती तनुर्यत्र क्रियायां तद्यथा तथा तुतोष मुमुदे वरयोरेकेन रामवनवासं द्वितीयेन भरतस्य राज्यं याचिष्यते।

पक्षे। या स्वर्गमार्गस्य स्वर्गवर्त्मविहारस्य मित्रं सहायः। दिवि ज्योतिरजरमारभेतामित्यादि श्रुतेः। सा वनिता द्रौपदी भर्तृवरस्य स्वामिश्रेष्ठस्यार्ज्जुनस्य योगतः सम्बन्धात् तुतोष चिरादर्ज्जुनं प्राप्य मुमुदे इत्यर्थः किम्भूता भक्त्या विनमन्ती चासौ तनुमध्यमा क्षीणमध्या चेति सा विशेषणयोः कर्म्मधारयः ॥ ६ ॥

महार्घेति। नृपेण दशरथेन महार्घमुक्तामयं महामूल्यमुक्ता-

कुमारशक्त्या करदीकृतायां
क्षितावपश्यन् स्वभुजेन साध्यम्।
अजातशत्रुर्नियमेन राजा
यज्ञैर्दिवं जेतुमुवाह दीक्षाम्॥१३॥
विधिमनुचरन् प्राग्वंशस्थस्तथा स महीपति
र्व्यतनुत हविर्धाराद्दष्टिं त्रिपिष्टपतुष्टये।

वशीकृत्य करं जग्राहेति भावः। स्रग्धरावृत्तमिदम्। म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयमिति लक्षणात्॥१२॥

कुमारेति। अजातः शत्रुर्यस्य सः राजा दशरथ कुमाराणाम् अश्ववारसैन्यानां शक्त्या बलेन करदीकृतायां करं राजग्राह्यभागं ददातीति करदा अकरदा करदा कृताइति करदीकृता अभूततद्भावे च्विः तथाविधायां क्षितौ। कुमारः स्यात्शुके स्कन्दे युवराजेऽश्ववारके इतिमेदिनी। स्वभुजेन निजबाहुबलेन साध्यं कर्त्तव्यम् अपश्यन् निजभुजसाध्यस्य सैन्यैः साधनान्निश्चिन्तः सन्नित्यर्थः यज्ञैरश्वमेधादिभिर्दिवं स्वर्गं जेतुं नियमेन यज्ञविध्युक्तनियमेन दीक्षाम् उवाह भेजे अश्वमेधयज्ञे दीक्षिताबभूवेत्यर्थः। कुमारस्य रामस्य शक्त्येति व्याख्यानमसत् तदानीं रामाद्यनुत्पत्तेः।

पक्षे अजातशत्रुर्युधिष्ठिरोराजा कुमाराणां युवराजानां भीमादीनां शक्त्या करदीकृतायां सर्व्वतोगृहीतकरायां क्षितौ स्वभुजेन साध्यम् अपश्यन् राजसूयाङ्गं सर्व्वतः करग्रहणं भ्रातृभिः प्रतिनिधिभिर्निष्पादयन्नित्यर्थः यज्ञैराजसूयाख्यैर्दिवं जेतुं पितुः सुचिरमिन्द्रलोकवासं सम्पादयितुम्। राजसूयस्य सर्व्वयज्ञेभ्यः प्राधान्यात् यज्ञैरिति गौरवे बहुवचनम्। दीक्षाम् उवाह राजसूये दीक्षितो बभूव॥१३॥

विधिमिति। विधिं यथोक्तविधानम् अनुचरन्ननुगच्छन् यथा विधानानुसारीत्यर्थः स महीपतिर्दशरथः पक्षे युधिष्ठिरश्च प्राग्वं-

दुःशासनावलेपेन भरतानिष्टकारिणा।
तस्य लक्ष्मीर्व्विपक्षेण कृष्टा कान्ता कचेष्विव ॥२५॥
नैव सभ्या न गुरवो न मित्रज्ञातिबान्धवाः।
तं निवारयितुं शेकुः क्रियमाणं महानयम् ॥२६॥

कुसुम्भयां न दयोर्म्मन्दे पृथौ वक्रेऽभिधेयवदिति मेदिनी। द्यूतकेल्या शकुनिकृतया द्यूतक्रीड़या नलस्येव निषधाधिपतेरिव भरतज्यायसो भरतकुलज्येष्ठस्य युधिष्ठिरस्य दीप्ता लक्ष्मीः राज्यं हृता। द्यूतकेल्येति कर्त्तरि तृतीया। उभयत्राप्युपमालङ्कारः ॥२४॥

दुःशासनेति। भरतानिष्टकारिणा भरतस्य स्वपुत्रस्य राज्यप्राप्तिरूपम् अनिष्टम् इष्टवद्भासमानमपि पितृमरणादिहेतुत्वात् वस्तुतोऽनिष्टं यद्वा सति ज्येष्ठे रामे ग्रहणौचित्यात् तद्रूपम् अनीप्सितं करोतीति तेन दुःशासनावलेपेन दुःशासनो दुरपनेयो योऽवलेपः पतिप्रेमास्पदत्वगर्व्वस्तेन हेतुना यद्वा दुर्निन्दितं यच्छासनं मन्थराकृतप्रबोधनं तदवलेपेन तज्जन्यगर्व्वेण हेतुना विपक्षेण कैकेयीरूपेण शत्रुणा कर्त्रा तस्य रामस्य लक्ष्मीः कचेषु कान्तेव कृष्टा नीता उपमया बलाद्गृहीतेत्यर्थः।

पक्षे भरतस्य भरतवंशस्य अनिष्टकारिणा विनाशहेतुत्वादशुभकारिणा विपक्षेण शत्रुणा दुःशासनस्य दुर्य्योधनभ्रातुरवलेपेन कृदभिहितभावत्वात् अवलिप्तदुःशासनेत्यर्थः दुर्य्योधनाज्ञप्तेनेति शेषः तस्य युधिष्ठिरस्य लक्ष्मीः साक्षाल्लक्ष्मीरूपा कान्ता द्रौपदी कचेषु केशेषु कृष्टा केशेष्वाकृष्य सभायामानीतेत्यर्थः इवेति वाक्यपूरणे अवधारणे वा कचेष्वेवाकृष्यानीता नतु सामवादादिनेत्यर्थः। अथेव चौपम्ये नियोगे वाक्यपूरणे। अवधारणे चेति मेदिनी ॥२५॥

नैवेति। क्रियमाणं कैकेय्या पक्षे दुर्य्योधनेन विधीयमानं तं रामस्य पक्षे युधिष्ठिरस्य राज्यभ्रंशनरूपं महान्तमनयं दुर्नीतिं निवारयितुं सभ्याः सभासदो नैव शेकुः तथा गुरवो वशिष्ठादयः पक्षे

ते चित्रकूटाचलपादभाजां
मखश्रियालङ्कृतदण्डकानाम्।
क्रमेण भेजुः श्रमनाशनानि
तपस्विनामाश्रममण्डलानि ॥ ४३ ॥

अवरोपितराज्येपि भर्त्तर्य्येकरसा यतः।

नार्य्याव्यवहारप्रतीतेः समासोक्तिरलङ्कारः। प्रहर्षणीवृत्तं यदाह भट्टकेदारः। म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षणीयमिति ॥ ४२ ॥

तइति। ते रामादयः चित्रकूटाचलस्य चित्रकूटनामकपर्व्वतस्य पादभाजां प्रत्यन्तपर्व्वतवासिनाम्। पादाः प्रत्यन्तपर्व्वता इत्यमरः। तथा मखश्रिया यज्ञसम्पदा अलङ्कृतदण्डकानां शोभित दण्डकारण्यानां तपस्विनां मुनीनां श्रमनाशनानि श्रमहराणि आश्रममण्डलानि तपोवनसमूहान् क्रमेण भेजुः प्रापुः भारद्वाजोपदेशेन चित्रकूटं गत्वा अत्रिप्रभृतिमुनीनामाश्रमान् क्रमेण जग्मुरित्यर्थः।

पक्षे ते युधिष्ठिरादयः चित्राण्यद्भुतानि कूटानि शिखराणि येषां तादृशाये अचलाः पर्व्वतास्तेषां पादभाजां प्रत्यन्तपर्व्वतवासिनाम्। कूटोऽस्त्रीशिखरं शृङ्गमित्यमरः। तथा मखश्रिया सततयज्ञानुष्ठानेन अलङ्कृतः शोभितः सुखेन गमित इत्यर्थः दण्डः कालोयैस्ते तथा तेषाम्। दण्डोऽस्त्री लगुड़े पुमान् व्यूहभेदे प्रकाण्डेऽश्वे कोणमन्थानयोरपि। सैन्ये काले मानभेदे चण्डांशोः पारिपार्श्विके इति-मेदिनी। मखश्रिया अलम् अत्यर्थं कृताविहिता दण्डकाः काम्यकर्म्माणि यैस्तेषाम्। दण्डकोदण्डकारण्ये काम्यकर्म्मणि च स्मृतइति शब्दार्णवः इति केचित्। तपस्विनां श्रमनाशनानि आश्रममण्डलानि क्रमेण भेजुः ॥ ४३ ॥

अवरोपितेति। तद्वधूस्तस्य रामस्य पत्नी सीता यतोयस्मात् अवरोपितराज्येपि त्यक्तराज्येऽपि भर्त्तरि स्वामिनि एकरसा अविच्छिन्नानुरागा अनुपाधिकप्रणयवतीत्यर्थः तेन हेतुना सा अन-

युद्धारब्धश्चण्डदोर्दण्डघातै-
र्भिन्दन् सन्धिं द्राग्विनिक्षिप्य भूमौ।
संरम्भोद्यत्पांशुकिर्म्मीरमेनं
रक्षोनाथं राक्षसारिर्म्ममन्थ ॥ ४६ ॥

रक्षसां भयदानेन तैरलङ्कृतदण्डकैः।
सुतीक्ष्णशरभङ्गाढ्या सहसारण्यभूरभूत् ॥ ४७॥

युद्धेति। युद्धारब्धः आरब्धयुद्धः। आहिताद्दिर्व्वाग्न्यादेरिति आरब्धस्य परभावः। राक्षसानामरिः शत्रू रामः राक्षसविनाशार्थ-मेव कृतावतार इत्यर्थः चण्डदोर्दण्डघातैः प्रचण्डबाहुदण्डप्रहारैर्न्नतु वाणाद्यस्त्रैः तस्याशस्त्रवध्यत्वादिति भावः। सन्धिं तस्य अवयवस-न्धानं भिन्दन् विदारयन् सन् द्राक् झटिति भूमौ निक्षिप्य अतएव संरम्भेण भूमियुद्धाड़म्बरेण उद्यद्भिरुत्तिष्ठद्भिः पांशुभिर्धूलिभिः किर्म्मीरं कर्व्वुरवर्णम् एनं रक्षोनाथं राक्षसप्रधानं विराधं ममन्थ जघान हत्वा अवटे निचिक्षेपेत्यर्थः।

पक्षे राक्षसारिर्भीमः संरम्भेण उद्यन्तः पांशवोयत्र क्रियायां तद्यथा तथा एनं रक्षोनाथं किर्म्मीरं वकराक्षसभ्रातरं ममन्थ। शेषं समानम्। किर्म्मीरोनागरङ्गेच कर्व्वुरे राक्षसान्तरे इति मेदिनी। शालिनीवृत्तं शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैरिति लक्षणात् ॥ ४६ ॥

रक्षसामिति। अलङ्कृतदण्डकैः शोभितदण्डकारण्यैस्तैरामा-दिभिः रक्षसां भयदानेन भयोत्पादनेन हेतुना सुतीक्ष्णशरभङ्गौ मुनिविशेषौ तदाढ्या तद्युक्ता अरण्यभूर्द्दण्डकारण्यभूमिः सहसा हसेन हास्येन सह वर्त्तमाना अभूत् सानन्दा बभूव राक्षसभयदान-प्रवणान् रामादीन् दृष्ट्वा सुतीक्ष्णशरभङ्गादयो मुनयस्तुतुषुरित्यर्थः। तैरिति भयदानक्रियापेक्षया कर्त्तरि तृतीया क्वचिदपवादविषयेऽप्यु-त्सर्गोऽभिनिविशतइति न षष्ठी।

अनन्तरं कलितकबन्धबन्धुरं
ततः क्षणात् क्षितितलसंस्तरायितम् ॥ २७॥
कबन्धभावात् पिशिताशनानां
प्रनृत्यतां कुक्षिमनु प्रविष्टाः।
विनिर्ययुः कण्ठपथेन तेषां
मूर्त्ताइव प्राणगणाः खगेन्द्राः ॥ २८ ॥

तैरित्यर्थः द्विषां शत्रूणां बलं सैन्यं प्रथमं रणोद्यतं युद्धाय कृतोद्योगं सत् उत् उत्तोलिता आयुधानाम् आलिः श्रेणिर्येन तादृशं व्यलोक्यत विलोकितम् अनन्तरं कलितैस्तेन कृतैः कबन्धैर्मस्तकशून्ययोधकलेवरैर्बन्धुरम् उन्नतानतं व्यलोक्यत। कबन्धोऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरमित्यमरः बन्धुरन्तून्नतानतमिति च। ततस्तस्मात् क्षणात् तत्परमित्यर्थः। दिग्देशकालार्थः पूर्वादिरिति आरादित्वात् गम्यमानपरशब्दयोगेऽपि पञ्चमी। क्षितितले यः संस्तरः शयनीयकटः स इवाचरतीति कर्त्तुराय इत्यादिना आयः ततः कर्त्तरि क्तः। तादृशं व्यलोक्यत। सर्व्वत्र त्रिदशजनैरित्येव कर्त्ता ॥ २७ ॥

कबन्धेति। कुक्षिमुदरम् अनुप्रविष्टाः युद्धसमये उदरं निर्भिद्य कृतप्रवेशाः खगेन्द्राः वाणश्रेष्ठाः। खगः सूर्य्ये ग्रहे देवे मार्गणे च विहङ्गमे इतिविश्वः। कबन्धभावात् अशिरस्कत्वभावं प्राप्य। यजगर्भत्वात् पञ्चमी। प्रनृत्यतां वेतालाधिष्ठानेन प्रकर्षेण नृत्यं कुर्व्वतां तेषां पिशितानि मांसान्यश्नन्तीति ते तथा तेषां राक्षसानां पक्षेऽसुराणाञ्च मूर्त्ता मूर्त्तिमन्तः प्राणगणाइव कण्ठपथेन मस्तकापगमादनावरणेन गलनालमार्गेण विनिर्ययुः निश्चक्रमुः नृत्यवेगेनेति भावः पूर्व्वं प्राणनिर्गमने जातेऽपि नृत्यवेगेन निर्गच्छत्सु वाणेषु तथाविध प्राणगणत्वसम्भावनया जात्युत्प्रेक्षालङ्कारः ॥ २८ ॥

सकामः कामोऽस्यामपि निजबधूकोपचकितः
प्रवृत्तानां स्वैरं सकलजनचित्तप्रमथने।
स्वयं लक्ष्मीभावं किल निजशराणां परिहर-
न्ननङ्गत्वं गत्वा मम हृदयदुर्गं निविशते॥१३॥
भवतु शतमखस्य स्वर्गलोकाधिपत्यं
भवतु तदुपभोग्या नन्दनोद्यानलक्ष्मीः।

सकामइति। कामः कन्दर्पः अस्यामपि न केवलमात्मपत्न्यां रत्यामेव किन्तु अस्यां सीतायामपि पक्षे द्रौपद्यामपि सकामः साभिलाष इत्यनुमिनोमीति शेषः कुतएतदनुमानमित्याह यतः सः निजबधूरतिः तस्याः कोपाच्चकितस्त्रस्तः सन् तथा सकलजनचित्तप्रमथने स्वपरविवेकाभावेन सकामजनमात्रहृदयोन्मादने स्वैरं स्वच्छन्दं नतु प्रयोक्तृप्रयोगसापेक्षं यथा तथा प्रवृत्तानां निजशराणां स्वयं स्वस्य लक्ष्मीभावं लक्ष्यत्वं परिहरन् अत्र चकारोबोध्यः परित्यजंश्च किलेत्युत्प्रेक्षायाम् अनङ्गत्वम् अशरीरत्वम् अथच प्रच्छन्नशरीरत्वं गत्वा मम रावणस्य पक्षे जयद्रथस्य हृदयमेव दुर्गं निविशते प्रविशति। न्यायादिविशादेरित्यात्मनेपदम्। अन्योऽपि कुतश्चिद्भयेन वाणपातवारणार्थञ्च प्रच्छन्नशरीरोभूत्वा दुर्गमाश्रयति एतेनास्यामतितरां सकामोऽस्मीति भावः। उत्प्रेक्षालङ्कारः शिखरिणीवृत्तम्॥१३॥

इमामनधिगच्छतोमहदप्यैश्वर्यं वृथेत्याह।

भवत्विति। शतमखस्य तिष्ठतु तावदन्येषां वार्त्ता शतमखानुष्ठानजनितपुण्यशालिन इन्द्रस्य स्वर्गलोकाधिपत्यं स्वाराज्यं भवतु तिष्ठतु तथा तेन शतमखेन उपभोग्या नन्दनोद्यानलक्ष्मीर्नन्दनवनसम्पत्तिर्भवतु तथा सततफुल्लं देवत्वेन निमेषशून्यत्वात् निरन्तरविकसितम्। लोकनम्रा स्तनाभ्यामित्यादिवत् क्रियाविशेषणस्यापि समासोवैवक्षिकः। तदीयं शतमखसम्बन्धि दृक्सहस्रं चक्षुःसहस्रं भवतु किन्तु तस्य सकलं स्वर्गलोकाधिपत्यादि सर्व्वम् अफलं निरर्थकम्। कुतइत्याह यः शत-

न खलु जलदगर्भाद्विद्यतेऽन्यत्र विद्युत्
स्फटिकजठरलम्भो मृग्यते पद्मरागः।
इयमपि वनभूमौ वर्त्तते हन्त बाला
नहि जगति निधानं सर्व्वलोकप्रकाशे ॥ २१ ॥
यावन्नरेन्द्रसुतसायकदक्षिणाङ्गः
सारङ्गरक्तकपिशं न वनं तदासीत्।

अन्तशब्दस्य स्वरूपवाचकत्वात् वनम् आगमिता आनीता। एतस्या जनबहुलायां नगर्य्यामवस्थाने बहूनां कामपारवश्यं भवेदित्यस्मादिव कारणादियं वनमानीतेति हेतूत्प्रेक्षा ॥ २० ॥

नखल्विति। विद्युत् सौदामिनी जलदगर्भात् मेघमध्यादन्यत्र न खलु विद्यते मेघमध्यएव तिष्ठतीत्यर्थः तथा पद्मरागोलोहितमणिविशेषः स्फटिकानां श्वेतोपलविशेषाणां जठरलम्भोमध्यनिविष्टोमृग्यते अन्विष्यते शोभाधिक्यजननात् स्फटिकमध्यएव स्थाप्यत इत्यर्थः तथा इयमपि बाला सीता पक्षे द्रौपदी हन्तेति हर्षे। वनभूमौ वर्त्तते अर्थान्तरेणेदं द्रढ़यति हि यतः जगति लोके निधानं निधीयमानं सुवर्णाद्युत्कृष्टं वस्तु सर्व्वलोकप्रकाशे सर्व्वलोकज्ञानगोचरस्थाने न स्थाप्यत इतिशेषः तस्माद्वनभूमावेवास्या अवस्थानं युक्तमित्यर्थः। अत्र निधानशब्दस्य निधीयमानवस्तुमात्रवाचकत्वेन सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासालङ्कारः ॥ २१ ॥

यावदिति। तद्वनं यावत् नरेन्द्रसुतस्य रामस्य सायकेन बाणेन दक्षिणे दक्षिणाङ्गे अरुर्व्रणो यस्य तादृशोयः सारङ्गोमायामृगोमारीचस्तस्य रक्तेन कपिशं श्यावं आसीत् तावत् स राजा रावणः तां सीतां ईक्षमीक्षं दृष्ट्वा दृष्ट्वा। आभीक्ष्ण्ये णमुल्। इति तर्कपरः पूर्व्वोक्तरूपं तर्कं कुर्व्वन् सन् मदनायुधेन कामबाणेन दक्षिणे दक्षिणाङ्गे ईर्म्मं व्रणोयस्य तादृशोबभूव कामपरवशोऽभवत्। व्रणो-

महीभृतोमाल्यवतस्तदा तं
वृहन्नलाढ्ये कटके वसन्तम्।
परप्रणीता स्वकलत्रपीडा
कङ्कं न सालम्भयदार्त्तियोगम् ॥ ५५ ॥
अथ घननिकुरम्बैरम्बुसम्भारनम्रैः
स्थगितगगनगर्भा विद्युदुद्योतहृद्या।

महीभृतइति। तदा सुग्रीवराज्यप्राप्तेः परं माल्यवतो माल्यवन्नामकस्य महीभृतः पर्व्वतस्य वृहद्भिर्नलैस्तृणविशेषैराढ्ये युक्ते कटके नितम्बे सानौ वा वसन्तं तं रामं सा अतिदुःसहा परेण रावणेन प्रणीता जनिता स्वकलत्रपीडा स्वपत्नीसीताविषयकविरहव्यथा कं कम् आर्त्तियोगं पीडासम्बन्धं न अलम्भयत् न प्रापयामास अपितु सर्व्वा एव अङ्गासौष्ठवतापाद्यवस्था अलम्भयदित्यर्थः। ताश्च यथा अङ्गेष्वसौष्ठवं तापः पाण्डुता कृशतारुचिः। अधृतिः स्यादनालम्बस्तन्मयोन्मादमूर्च्छनाः। मृतिश्चेति क्रमाज्ज्ञेया दश स्मरदशा इहेति। तमिति लभेरुपसर्ज्जनीभूतगत्यर्थत्वात् प्रयोज्यकर्म्म।

पक्षे तदा कीचकेन द्रौपद्युपरोधात् परं माल्यवतोधृतमाल्यस्य निश्चिन्ततया स्रगाद्युपभोगिन इत्यर्थः महीभृतो राज्ञो विराटस्य वृहन्नलाढ्ये वृहन्नलानामकार्ज्जुनयुक्ते कटके राजधान्यां वसन्तं कङ्कं गोपनार्थं कङ्केति नामधारिणं तं युधिष्ठिरं सा परप्रणीता कीचकेन जनिता स्वकलत्रस्य द्रौपद्याः पीड़ा उपरोधः आर्त्तियोगं न अलभत् भीमेन कीचकस्य विनाशादिति भावः न अलम्भयत् अपितु अलम्भयदिति केचित्। कटकं वलये सानौ राजधानीनितम्बयोरिति विश्वः ॥ ५५ ॥

अथ षोड़शभिः श्लोकैर्वर्षर्त्तुं वर्णयति। अथेति। अथ रामस्य माल्यवत्पर्व्वतप्रवेशानन्तरं पक्षे कीचकवधानन्तरं प्रावृट् वर्षर्त्तुः उज्जृम्भतेस्म उदियाय किम्भूता अम्बुसम्भारेण जलभरेण नम्रैर्लम्ब-

स व्यञ्जयामास हरेस्तनूज-
मात्मानमर्कात्मजशासनस्थम् ॥ १० ॥
प्रयत्नवानुत्तरकीर्त्तिसिद्धये
प्रदर्शयिष्यन् बहुशक्तिसम्पदम् ।
स तालबाणासनकर्षणं द्विषां
पुरः स्फुरत्केतु वनं बभञ्ज ॥११॥

दिशि प्रख्याप्येत्यर्थः सन्दर्शितं राज्ञः क्षत्त्रियस्य चिह्नं युद्धनैपुण्यं राज्ञः शक्रस्य चिह्नं तद्दत्तबाणादिकं वा येन तादृशः सन् । राजा प्रभौ च नृपतौ क्षत्त्रिये रजनीपतौ यक्षे शक्रे च पुंसि स्यादिति मेदिनी । हरेरिन्द्रस्य तनूजम् आत्मानम् अर्कात्मजस्य सूर्य्यपुत्रस्य कर्णस्य शासने शास्तौ दमने इत्यर्थः तिष्ठतीति तादृशं व्यञ्जयामास । शासनं नृपदत्तोर्व्यां शास्त्राज्ञालेखशास्तिष्विति हेमचन्द्रः । सर्व्वान् परित्यज्य असत्क्लेशप्रधानहेतोः कर्णस्य शासनं करिष्यामीति वारम्वारं तदाक्रमणेन सूचयामासेत्यर्थः ॥ १० ॥

प्रयत्नेति । स हनूमान् उत्तरा उत्तरकालीना या कीर्त्तिः राक्षससैन्यवधादिजन्यं यशस्तस्याः सिद्धये बह्वी या शक्तिसम्पत् सामर्थ्यातिशयस्तां प्रदर्शयिष्यन् प्रकर्षेण राक्षसान् दर्शयितुम् । हेतौ शतृप्रत्ययः । प्रयत्नवान् सन् पुरः प्रथमं द्विषां राक्षसानां वनम् उपवनं बभञ्ज किम्भूतं तालानां बाणानां नीलझिण्टीनाम् असनानां जीवकवृक्षाणाञ्च कर्षणं प्रथमत उत्पाटनं यत्र तत् तथा स्फुरन् शोभमानः केतुश्चिह्नविशेषः पताका वा यत्र तत् । केतुर्ना रुक् पताकादिग्रहोत्पातेषु लक्ष्मणीति मेदिनी ।

पक्षे सोऽर्ज्जुनः उत्तरस्य विराटतनयस्य कीर्त्तिसिद्धये प्रयत्नवान् तथा बहुशक्तिसम्पदं दुर्य्योधनादीन् प्रदर्शयिष्यन् सन् तालवत् दीर्घं यद्बाणासनं धनुस्तालबाणासनं तस्य कर्षणं यत्र क्रियायां तद्यथा स्यात्तथा तालेन करतलेन बाणासनस्य कर्षणं यत्रेति वा । तालः

उदायुधैर्व्यरुचदसौ पताकिभि-
र्विरोधिभिर्मृधभुवि कोष्ठकीकृतः।
तडिच्छटाद्युतिजटिलैर्बलाहकै-
र्बलाकिभिर्वृतइव विन्ध्यभूधरः॥ १४॥
परोज्झितानपि परमर्म्मभेदिनः
सपत्रिणस्तृणमिव चिन्तयन् क्षणात्।

णेऽपि च दृश्यते इति मेदिनी। परितः समन्तात् रणस्थितं लघुहस्तत्वात् रणस्थैः सर्वैः सह युद्धयन्तमित्यर्थः तमर्ज्जुनं समुद्ययुश्चन्यत् समानम्। रुचिरावृत्तं लक्षणमुक्तं प्राक्॥१३॥

उदायुधैरिति। असौ हनूमान् पक्षेऽर्ज्जुनः मृधभुवि युद्धभूम्याम् उदायुधैरुल्लासितप्रहरणैः तथा पताकिभिः सध्वजैर्विरोधिभिः शत्रुभिः कोष्ठकीकृतः मध्यगतीकृतः वेष्टित इत्यर्थः। कोष्ठः कुसूले चात्मीये मध्ये कुक्षौ गृहस्य चेति मेदिनी। ततः स्वार्थिकः कप्रत्ययः। तादृशः सन् तड़िच्छटानां विद्युद्दाम्नां द्युतिभिः कान्तिभिर्जटिलैः जटायुक्तैरिव व्याप्तैरित्यर्थः। इदम् उदायुधैरित्यस्य प्रतिविम्बनम्। तथा बलाकिभिर्वकपङ्क्तिसहितैः। इदं पताकिभिरित्यस्य प्रतिविम्बनम्। बलाका वकपङ्क्तिः स्याद्बलाका विसकण्ठिका। बलाका कामुकीमाऊर्बलाकस्तु वकोमतइति शाश्वतः। तादृशैर्बलाहकैर्मेघैर्वृतो विन्ध्यभूधरइव व्यरुचत् शुशुभे। अत्रेवशब्दस्योपमानोक्तरलाभावान्नोपमा किन्तूत्प्रेक्षा तया च शत्रवस्तस्य किञ्चिदप्यपकर्त्तुं न शक्ताइति वस्तु ध्वन्यते॥१४॥

परोज्झितानिति। स बली बलवान् हनूमान् पक्षेऽर्ज्जुनः परैः शत्रुभिरुज्झितान् क्षिप्तान्। अपिर्भिन्नक्रमे। परस्य मर्म्मभेदिनोऽपि पत्रिणोवाणान् तृणमिव चिन्तयन् तृणवदसारान् मन्वानः सन् रणभुवि युद्धभूम्यां मदोत्कटोमदकलोगजः पल्वलमल्पसरइव वैरि-

हरिप्रभावोपचितक्ष्माभृ-
न्निवेशनैश्चायततां प्रपन्नम् ।
महीमहाम्भोरुहनालकल्पं
ददर्श सेतुं हरिवंशकेतुः ॥ १६ ॥

स द्वारकान्तां नगरीं गरिष्ठां
संप्रस्थितस्तेन पथा नृवीरः ।
ददर्श धीरो हरिवाहिनीभि-
र्निरन्तरालानि ककुम्मुखानि ॥ १७ ॥

तत्सदृशमित्यर्थः अतएवोपमा तत्कल्पनं प्रति च मणिप्रभाभासुरत्वस्य विशेषणगत्या हेतुत्वात् काव्यलिङ्गं तस्मादनयोरङ्गाङ्गित्वेन सङ्करः ।१५

हरीति । पुनः किम्भूतं हरीणां वानराणां पक्षे हरेः श्रीकृष्णस्य प्रभावेण सामर्थ्येन पक्षे अनुभावेन उपचिताः प्रथमं तीरे आनीय उपचयं राशित्वं गमिताः अन्तर्भावितण्यर्थत्वादयमर्थः । ये क्ष्माभृतः पर्व्वतास्तेषां निवेशनैरारोपणैश्च आयतताम् आयामम् । अयनतामिति पाठे अयनतां वर्त्मत्वं प्रपन्नं प्राप्तम् । तथा मही पृथिवी महाम्भोरुहमिव बृहत्पद्ममिव महीमहाम्भोरुहम् । पुरुषव्याघ्रवदुपमितिसमासः । तस्य नालकल्पं वृन्तसदृशम् । जम्बूद्वीपभूमेः पद्माकारतया पुराणेषु वर्णितत्वात्तन्नालदण्डस्य चावश्यमपेक्षितत्वादयं सेतुस्तन्नालमिवेत्युपमा ॥ युग्मकम् ॥ १६ ॥

स इति । स नृवीरो मनुष्येषु शूरः धीरो धैर्य्यवान् रामः तेन नलकृतेन सेतुमयेन पथा द्वारैश्चतुर्भिः सिंहद्वारैः कान्तां मनोज्ञां तथा गरिष्ठाम् अतिगुर्व्वीं नगरीं लङ्कां संप्रस्थितः सन् हरिवाहिनीभिर्वानरसेनाभिर्निरन्तरालानि निरवकाशीकृतानि व्याप्तानीत्यर्थः ककुम्मुखानि दिङ्मुखानि ददर्श । दिशस्तु ककुभः काष्ठा इत्यमरः ।

न्यवारयद्द्रुतमभिपत्य गोपतेः
शरीरजो भुजधृततुङ्गगोत्त्रधूः ॥ ४ ॥
हरिप्रणेतारमुदूढवाणं
महीगतं भानुमिव स्फुरन्तम्।
जित्वा स वीराननितरामरौत्सी-
दाकाशकुक्षिम्भरिभिः पृषत्कैः ॥ ५ ॥

महीपते रामस्य प्रतिमुखं सम्मुखागतं द्विषं द्वेष्टारम् इन्द्रजितो मेघनादस्य गुरुं पितरं रावणं न्यवारयत् निवारितवान्।

पक्षे भुजेन धृता तुङ्गा महती गोत्त्रस्य वंशस्य धूर्येन सः तथा इन्द्रजित् खाण्डवदाहे इन्द्रविजयी गोपतेः स्वर्गपतेरिन्द्रस्य शरीरजोऽर्ज्जुनः महाहवे महीपतेर्युधिष्ठिरस्य अभिहिते असत्कारे ग्रहणे इत्यर्थः मनोरथो यस्य तं अतएव तस्यैव द्विषं प्रतिमुखञ्च गुरुं कौरवाचार्य्यं द्रोणं द्रुतमभिपत्य न्यवारयत्। द्रोणस्तु गुरुराचार्य्य इति त्रिकाण्डशेषः। रुचिरावृत्तम् ॥ ४ ॥

हरीति। स रावणः आकाशकुक्षिम्भरिभिराकाशोदरपूरकैः पृषत्कैर्वाणैः हत्वा वीरान् वानरयोधान् जित्वा। क्वचिद्भित्त्वेति पाठः। उदूढवाणं गृहीतवाणाख्यवृक्षं। वाणो वृक्षविशेषे स्याच्छरस्यावयवे शरे इति हेमचन्द्रः। तथा महीगतं भूतलागतं भानुमिव सूर्य्यमिवेत्युत्प्रेक्षा, स्फुरन्तं तेजसा ज्वलन्तं हरीणां वानराणां प्रणेतारं नायकं सुग्रीवं नितरामत्यर्थम् अरौत्सीत् रुरोध। महीगतं गाढ़प्रहारेण भूमौ पतितं हरिप्रणेतारं जित्वा वीरानरौत्सीदिति वा।

पक्षे स द्रोणः वीरान् पाण्डवयोधान् जित्वा उदूढवाणं गृहीतशरं शरैर्युध्यमानमित्यर्थः हरिः कृष्णः प्रणेता सारथिर्यस्य तमर्ज्जुनम् अरौत्सीत्। शेषं समानम् ॥ ५ ॥

निबद्धवैरस्य विरोधिवर्गै-
र्न स्वास्थ्यमासीत् पितुरस्य चित्ते ॥२२॥
प्रधानहेतुभूतस्य निजात्मजनिपातने।
पराक्रमं न मम्रषे वृद्धक्षत्त्रात्मजस्य सः ॥ २३ ॥
औद्धत्यपश्चात्कृतसिन्धुराजे
पुनः प्रतिद्वन्द्विनि वीरचक्रे।

अस्य अस्य नरान्तकस्य पितूरावणस्य पक्षेऽभिमन्योः पितुरर्ज्जुनस्य चित्ते स्वास्थ्यं सुखित्वं नासीत् अपितु दुःखमेवासीदित्यर्थः। अत्रा-स्वास्थ्यं प्रति द्वितीयतृतीयविशेषणयोर्हेतुत्वात् काव्यलिङ्गम् ॥ २२॥

प्रधानेति। स रावणः निजात्मजस्य नरान्तकस्य निपातने अङ्गदेन कृतेऽपीति शेषः प्रधानहेतुभूतस्य मुख्यकारणरूपस्य तेनैव वानरसैन्याहरणादिति भावः। वृद्धो यः क्षत्तः क्षत्त्रियो दशरथ-स्तस्यात्मजस्य रामस्य पराक्रमं शौर्य्यं न मम्रषे सोढ़वान् नरान्तकेऽङ्गदेन निपातितेऽपि रामं प्रति भृशं चुकोपेत्यर्थः।

पक्षे सोऽर्ज्जुनः निजात्मजस्याभिमन्योर्निपातने दौःशासनिना कृतेऽपीति शेषः प्रधानहेतुभूतस्य अनेनैव शिववरप्राप्त्या व्यूहभेदो-द्यतभीमादीनां निवारणादिति भावः। वृद्धक्षत्त्रो नाम सिन्धुपति-स्तदात्मजस्य जयद्रथस्य पराक्रमं न मम्रषे, श्वो यावदादित्यस्तपति तावज्जयद्रथो मया हन्तव्यः अन्यथा आत्मानं घातयिष्यामीति प्रतिज्ञां चकारेत्यर्थः। अत्र पराक्रमामर्षणं प्रति भूतान्तविशेषणस्य हेतुत्वात् काव्यलिङ्गम् ॥ २३ ॥

औद्धत्येति। औद्धत्येन चापल्येन पश्चात्कृतो न्यक्कृतः सदृशी-कृत इति यावत् सिन्धुराजः समुद्रो येन तत्तथा तस्मिन् वीरचक्रे देवान्तकादिवीरसमूहे पुनः प्रतिद्वन्द्विनि प्रतिपक्षे सति योद्धुमुद्यते सतीत्यर्थः नरेन्द्रस्य रामस्य सेना वानरबलं भानुमतः सूर्य्यस्य प्रभा तेजः प्रातर्दिनादौ दिवसाकाशमिव रणाङ्गनं प्राप।

सन्नद्धवैरापि निरस्तधैर्य्या
विभ्रष्टनानायुधयोधवाहा ।
दशेव पुंसां प्रतिकूलदैवात्
सेना परेषामभवत् पराची ॥ २१ ॥
पितुर्निपातादनुबन्धिवैरः
पत्युर्बलानां तनयः खरस्य ।

पक्षे पवमानोऽरणिनिर्मथनोत्पन्नो गार्हपत्याग्निः । तथाच मात्स्ये, अथ यः पवमानस्तु निर्मथ्योऽग्निः स उच्यते । सचवै गार्हपत्योऽग्निः प्रथमो ब्रह्मणः स्मृतइति । तस्मादुद्भवो यस्य सः द्रोणविनाशाय याजोपयाजहूयमानयज्ञाग्नेरुत्पन्न इत्यर्थः तथा तीव्रकर्म्मा क्रूर-कर्म्मा तथा सर्वैरश्विरवैरी धृष्टद्युम्नो द्रुपदपुत्रः निर्मुक्तास्त्रप्रकरम् अश्वत्थामवधवार्त्ताश्रवणेन शोकाकुलतया न्यस्तशस्त्रसमूहं तं द्रोणम् अभित आभिमुख्येन सपदि अभ्युपेतः प्राप्तः सन् अथ संग्रामाग्रे कौरवान् कुरुवंश्यान् दुर्य्योधनादीन् क्षोभयित्वा द्रोणस्य शिरः कायात् पृथक् कुर्व्वन् खड्गेन छित्वा एनं द्रोणं त्रिदिवपदवीपान्थं व्यधत्त ॥२०॥

सन्नद्धेति । परेषां राक्षसानां पक्षे कौरवाणां सेना सन्नद्ध-वैरापि शत्रुष्वासक्तविद्वेषापि निरस्तधैर्य्या सेनापतेर्निकुम्भस्य पक्षे द्रोणस्य वधात् धैर्य्यरहिता तथा विभ्रष्टानि करेभ्यः स्खलितानि नानायुधानि येषां तादृशा योधा येषु तादृशा वाहा अश्वा यत्र तादृ-शी च सती प्रतिकूलदैवात् पुंसां दशा अवस्थेव पराची रणात् परा-ङ्मुखी अभवत् । उपमा ॥ २१ ॥

पितुरिति । युगक्षये चेत्यत्र चकार आनन्तर्य्यार्थः रावण-नियोगानन्तरमित्यर्थः बलानां चतुर्दशसहस्रराक्षसयोधानां पत्युः खरस्य खरनामकस्य राक्षसस्य तनयो मकराक्षः मकराक्षनामा राक्षसः पितुः खरस्य निपातात् दण्डकारण्ये रामेण वधाद्धेतोः अनुबन्धि अनुदिनं वर्द्धमानं वैरं यस्य सः तथा रोषेण मूर्च्छन् मोहं

रामावरजवाचा सा पर्य्यवस्थापिता चमूः ॥ २५॥

श्रीकण्ठकण्ठमचिरादिव कालकूटं
पूर्व्वं पयोनिधिमिवौर्व्वमुनेः प्रकोपः।
आसाद्य मानवतनुं पुरुषं पुराणं
तस्य प्रतापमहिमा प्रशशाम शत्रोः ॥ २६ ॥

वाचा पर्य्यवस्थापिता कृष्णवाक्येन नारायणास्त्रप्रतिघाताय सर्व्वेष्वपि सैन्येषु त्यक्तशस्त्रेषु भीमो वीर्य्यमदात् यन्नायुधं तत्याज स एव तस्य सम्यग्भ्रम इति भावः। तादृशञ्च भीमं नारायणास्त्रेणाक्रान्तं कृष्णार्ज्जुनौ स्वयमागत्य रथादवरोपितं त्याजितास्त्रञ्च चकारेति भारतम्। कृष्णवाक्च। शीघ्रं न्यस्यत शस्त्राणि वाहेभ्यश्चावरोहत। एष योगोऽत्र विहितः प्रतिघाते महात्मना। द्विपाश्वस्यन्दनेभ्यश्च क्षितिं सर्व्वेऽवरोहत। एवमेतन्न वोहन्यादस्त्रं भूयो निरायुधानित्यादिरूपा ज्ञेया॥ २७॥

श्रीकण्ठेति। तस्य शत्रोर्मकराक्षस्य प्रतापमहिमा पराक्रमातिशयः मानवतनुं लीलया मनुष्यमूर्त्तिं वस्तुतः पुराणं सर्व्वप्रपञ्चेभ्यः प्राचीनं पुरुषं परमात्मानं रामम् आसाद्य प्राप्य प्रशशाम प्रशान्तो बभूव रामो मकराक्षं जघानेति वाक्यार्थः। एतमर्थमुपमाभ्यामुत्कर्षयति श्रीकण्ठस्य शिवस्य कण्ठम् आसाद्य अचिरात् शीघ्रं कालकूटमिव तथा पूर्व्वं प्राक् पयोनिधिम् आसाद्य और्व्वमुनेः प्रकोपः क्रोधइव सहि वाड़वाग्निरूपेण परिणतः समुद्राभ्यन्तरे निलीनइति पौराणिकी कथा।

पक्षे तस्य शत्रोरश्वत्थाम्नः प्रतापमहिमा नारायणास्त्रकृततेजस्वित्वातिशयः मानवतनुं पुराणं पुरुषं कृष्णम् आसाद्य प्रशशाम पूर्व्वोक्तकृष्णयुक्त्यैव नारायणास्त्रप्रतिघातादिति भावः। अन्यत् समानम्। अत्र एकस्योपमेयस्योपमानद्वयेनोत्कर्षणान्मालोपमा॥२६॥

प्रगे सहस्रांशुरिवोज्ज्वलप्रभः
सवेगसज्यीकृतभीमकार्म्मुकः।
रथेन भूयः समराय निर्ययौ
विपक्षवाञ्छानुगशल्यसारथिः॥ ८॥

सन्ध्यायां स्वनिवेशभूमिं स्वशिविरस्थानं सूर्य्यो द्वीपान्तरमिव विवेश सन्ध्यायामुपस्थितायां बलानि अवहृत्य निजशिविरं जगामेत्यर्थः। उत्प्रेक्षोपमयोः संसृष्टिः॥ ७॥

प्रगेइति। प्रगे सहस्रांशुरिव प्रातःकालीनः सूर्य्यइव उज्ज्वला प्रभा कान्तिर्यस्य सः तथा वेगेन झटिति सज्यीकृतं सगुणीकृतं भीमं भयङ्करं कार्म्मुकं धनुर्येन सः तथा विपक्षवाञ्छा शत्रुवधेच्छा तस्या अनुगानि अनुकूलानि शल्यान्यस्त्रविशेषाः सारथिश्च यस्य तादृश इन्द्रजित् भूयः पुनः रथेन रथमारुह्य। तदर्थमेव तस्य लङ्काप्रवेशादिति भावः। समराय समरं कर्त्तुम्। तुंगर्भात् कर्म्मणि इति चतुर्थी। निर्ययौ लङ्कातो निर्जगाम।

पक्षे सहस्रांशुरिव उज्ज्वलप्रभः स कर्णः प्रगे प्रातः कृताह्निक इति शेषः भूयः पुनः परदिने इत्यर्थः रथेन समराय निर्ययौ शिविरान्निर्जगाम। अस्मिन् पक्षे रथेनेति स्वरूपकथनमात्रम्। किम्भूतः विपक्षाणां युधिष्ठिरादीनां या वाञ्छा अभिलषितं कटूक्त्या कर्णस्य तेजोवध इत्यर्थः तदनुगस्तत्कारी शल्यो मद्राधिपः सारथिर्यस्य सः अर्ज्जुनस्य कृष्णः सारथिर्ममतु तथाविधः सारथिश्चेत्तं जेतुं शक्नोमीति कर्णेनोक्ते दुर्य्योधनेनानुरुध्य शल्यः कर्णस्य सारथिः कृत इत्यर्थः। सच पूर्व्वं दुर्य्योधनेन स्वपक्षतां नीतोऽपि कर्णस्य सारथिर्भूत्वा युष्माकं पाण्डवानामानुकूल्याय तस्य तेजोवधं करिष्यामीति प्रतिज्ञातवानित्यस्य विपक्षवाञ्छानुगत्वम्। शेषं समानम्। प्रथम पादे उपमा॥ ८॥

सद्यः प्रत्यर्थिवर्गैरपि गुणविवशैस्तूयमानप्रकर्षौ
प्रायुद्ध्येतांप्रवीरौ सुभटजनदृशां लक्ष्यभूतावुभौतौ।१२

स वाक्शरैराहितमर्म्मघट्टन-
श्चकार पीडां महतीं महीपतेः।

कर्षयन्तौ दूरं नयन्तौ हुङ्कारश्रवणभयेन दिग्गजान् बहलमदस्राविणः कुर्व्वन्तावित्यर्थः भयेनापि गजा मदं मुञ्चन्तीति प्रसिद्धेः तथा प्रत्यर्थिवर्गैरपि का कथा आत्मीयोदासीनानां शत्रुवृन्दैरपि गुणविवशैः तयोः शौर्य्यमोहितैः सद्भिः सद्यः स्तूयमानप्रकर्षौ प्रशंसित युद्धोत्कर्षौ तथा सुभटजनदृशां सुयोद्धृजनचक्षुषां लक्ष्यभूतौ सुयोद्धृभिः साभिनिवेशं दृष्टावित्यर्थः। अत्र वाणदृष्ट्या देवानां गगनसञ्चारनिवारणस्य हुङ्कारेण दिग्गजमदनदीनिर्गमनस्य चासम्बन्धेऽपि तत्सम्बन्धकथनादतिशयोक्तिरियं तृतीयपादे च अपिकारादर्थापत्तिस्तदासां संसृष्टिः। स्रग्धरावृत्तम्॥१२॥

सइति। स इन्द्रजित् वाचः शरा इव वाक्‌च शराश्चेति वा वाक्शराः तैः कृत्वा आहितं कृतं मर्म्मघट्टनं हनूमदादीनां मर्म्मपीड़ा येन तादृशः सन् क्षणेन तत्क्षणमेव सीतायाः मायारचिताया जानक्या यत् क्षपणं वधस्तदेव व्यलीकं अत्यन्ताप्रियकर्म्म। अलीकं त्वप्रियेऽनृते इत्यमरः। तस्माद्धेतोर्महीपते रामस्य महतीं पीड़ां चकार हनूमदादिमुखेन इन्द्रजित्कर्तृकसीतावधं श्रुत्वा रामः शोकेन मुमोहेत्यर्थः। उपमयेदं दृढ़यति सीता लाङ्गलपद्धतिः। सीता लाङ्गलपद्धतिर्वैदेहीस्वर्गगङ्गाक्षिति मेदिनी। तस्याः क्षपणमसंभवस्तदेव व्यलीकं तस्माद्धेतोः कृषीवलस्य कर्षकस्य महानत्यन्तोऽवग्रहो वृष्टिप्रबन्ध इव। अवादृष्टिप्रतिबन्धे इत्यवपूर्व्वाद्‌ग्रहतेर्डः। अवग्रहो यथा सीताक्षपणरूपाप्रियात् कर्षकस्य महतीं पीड़ां करोति तथेत्यर्थः।

पक्षे स कर्णः शराश्च वाचश्च वाक्शराः। अल्पाच्त्वात् वाचः प्राग्भावः तैः कृत्वा आहितमर्मघट्टनः सन् प्रथमं शरैः पश्चात् वाचा

रणकर्म्म महच्छचोर्नासोढ नरदेवजः ॥ २९ ॥

ततः प्रतीतो जगतीन्द्रसूनुः
समाप्तिमिच्छन् समरार्णवस्य ।
सन्धाय सन्ध्यां सफलीकरिष्यन्
कर्णान्तसज्जं शरमुत्ससर्ज्ज ॥ ३० ॥

उद्यताञ्जलिकेनासौ नानाविक्रमशोभितः ।

रणे गणे । कुलालाद्युपकरणे राष्ट्रे सैन्यरथाङ्गयोरिति हेमचन्द्रः । तथा निस्पन्दं वानरैर्भग्नत्वादचलं यत् स्पन्दनं रथस्तस्मात्तदेव वा आपद्यस्य ईदृशस्यापि शचोरिन्द्रजितो महदतिशयितं रणकर्म्म नासोढ मर्षितवान् ।

पक्षे नरदेवजो नरो नरावतारो देवजो महेन्द्रपुत्रोऽर्ज्जुनः धरया ग्रस्तचक्रस्य भार्गवशापात् भूमिनिमग्नरथाङ्गस्य अतएव निस्पन्दस्यन्दनापदः शचोः कर्णस्य । शेषं तुल्यम् ॥ २९ ॥

ततइति । ततस्तस्मादनन्तरं समरएव दुरवगाहत्वादर्णवस्तस्य समाप्तिमिच्छन् शत्रुवधेन पारं जिगमिषुः तथा प्रतीतः ख्यातो जगतीन्द्रसूनुः राजपुत्रो लक्ष्मणः सन्ध्यां प्रतिज्ञां, नाहत्वा तं निवर्त्तिष्ये इत्यादिरूपाम् । सन्ध्या पितृप्रसूनयोः प्रतिज्ञाचिन्तयोः स्थिताविति भूरिः । निरर्थकारपाठे सएवार्थः सफलीकरिष्यन् सफलां कर्त्तुम् । लक्षणहेत्वोः क्रियाया इति हेतौ शतृ । कर्णान्ते श्रवणप्रान्ते सज्जं सम्भृतम् । सन्नद्धे संभृते सज्ज इतिविश्वः । आकर्णान्तकृष्टमित्यर्थः शरं सन्धाय शत्रुवधानुगुण्येन धनुष्यारोप्य उत्ससर्ज्ज चिक्षेप ।

पक्षे जगति प्रतीत इन्द्रसूनुरर्ज्जुनः कर्णस्य राधेयस्य अन्ताय नाशाय सज्जं सज्जितं शरमुत्ससर्ज्ज । अन्यत्तुल्यम् ॥ ३० ॥

उद्यतेति । नाना बहुविधा ये विक्रमाः पराक्रमा गतिभेदा वा तैः शोभितोऽसौ लक्ष्मणः पक्षेऽर्ज्जुनः उद्यतश्चासावञ्जलिकोऽञ्जल्याकार-

विशिखं विशिखेन घ्नन् विस्मयं कस्य नाकरोत् ॥३१

क्षिप्रोत्क्षिप्तभ्रुकुटिभुजगाभीलभालं पुरस्ता
न्न्यस्तापाङ्गं विशिखशिखया साकमेवारिकण्ठे।
लूनं तेन प्रसभमिषुणा भूषयामास भूमिं
जिष्णोर्द्वेष्टुर्मुखमशनकैर्मुक्तहुङ्कारमेव ॥ ३२ ॥

अङ्गभर्त्तुः शिरश्छिन्नमिति गद्गदवादिनी।

त्वादञ्जलिकनामा चेति विशेषणयोः कर्म्मधारयः। तादृशेन विशिखेन वाणेन कृत्वा विशिखं शत्रोर्वाणं घ्नन् निवारयन् सन् कस्य विस्मयं नाकरोत् अपि तु सर्व्वस्येत्यर्थः। यद्यपि रामायणेऽञ्जलिकवाण प्रयोगो नोक्तस्तथापि विशेषोऽपि नोक्त इति न दोषः, यद्वा उद्यतः प्रणामार्थं शत्रुभिर्विहितोऽञ्जलिः करसंपुटो यस्य स तथा तेन यं दृष्ट्वा भयेन शत्रवोऽञ्जलिं कृत्वा प्रणम्य पलायन्ते तेनेत्यर्थः कथमप्यप्रतिकार्य्येणेति परमार्थः॥ ३१॥

क्षिप्रइति। जिष्णोर्जयिनो लक्ष्मणस्य पक्षे जिष्णोरर्ज्जुनस्य तेनेषुणा वाणेन विशिखशिखया शत्रुप्रक्षिप्तवाणाग्रेण साकमेव सहैव प्रसभं झटिति लूनं छिन्नं द्वेष्टुः शत्रोरिन्द्रजितः पक्षे कर्णस्य मुखं भूमिं समराङ्गनं भूषयामास छिन्नं सत् भूमौ पपातेत्यर्थः किम्भूतं पुरस्तात् प्रथमं क्षिप्रं शीघ्रम् उत्क्षिप्ता क्रोधेनोर्द्ध्वं नीता या भ्रुकुटिः सैव भीषणत्वात् भुजगः सर्पस्तेन आभीलं भीषणं भालं ललाटं यस्य तत् आभीलं भीषणे कृच्छ्रे इति हेमचन्द्रः। भालं तेजोललाटयोरिति मेदिनी। ततश्च अरेर्लक्ष्मणस्य पक्षेऽर्ज्जुनस्य कण्ठे न्यस्तापाङ्गं शरव्यत्वाय व्यापारितनेत्रप्रान्तं तथा अशनकैरुच्चैर्यथातथा मुक्तहुङ्कारमेव। मुच्यमानहुङ्कारसहितमेव। मन्दाक्रान्तावृत्तम् ॥ ३२ ॥

अङ्गेति। अङ्ग भो लङ्कावासिनः भर्त्तुरस्माकं सेनापतेरिन्द्रजितः अङ्गभर्त्तुश्चतुरङ्गसेनापतेरिति वा पक्षे अङ्गदेशाधिपस्य

उपायमस्मै निभृतं न्यवेदय-
ज्जयोचितं कोऽपि पुरातनो मुनिः ॥ १७ ॥
प्रवर्त्त्य भीमोऽथ लसन्महायुधं
विरोधिवीरं निजघान मर्म्मणि ।
पुरेव रामः शतमन्युसम्भवं
महास्त्रमोक्षेण निशाचरेश्वरम् ॥ १८ ॥

नृचन्तमित्यर्थः न्टपात्मजं रामं रणे विद्वेषिणः शत्रो रावणस्य वधे ससंशयं छिन्नेष्वपि शिरःसु रावणस्य पुनः सशिरस्कत्वदर्शनात् संशयितं विलोक्य अस्मै रामाय जयोचितं तद्वधयोग्यम् उपायं ब्रह्मास्त्रेणास्य वक्षसि प्रहारः कर्त्तव्य इत्येवंरूपं निभृतं गुप्तं यथा तथा न्यवेदयत् ज्ञापयामास ।

पक्षे कोऽपि पुरातनो मुनिः कृष्णप्रेरितो नरावतारोऽर्ज्जुनः जगत्प्राणभुवं वायुतनयं न्टपात्मजं भीमं रणे विद्वेषिणो दुर्य्योधनस्य वधे ससंशयं तुल्यबलतया सन्दिहानं विलोक्य अस्मै भीमाय जयोचितम् उपायम् अस्योरुदेशे गदया प्रहर्त्तव्यमित्येवंरूपं निभृतं न्यवेदयत् स्वोरौ हस्ताघातभङ्ग्या असूचत् ॥ १७॥

प्रवर्त्त्येति । अथ मातलिनिवेदनानन्तरं रामः भीमो लसन् भयङ्करः सन् महायुधं महान्तं संग्रामं प्रवर्त्त्य अतिशयेन वर्त्तयित्वा महायुधं मन्त्रात्मकं ब्रह्मास्त्रं प्रवर्त्त्य आवर्त्त्येति वा पुरा पूर्व्वं शतमन्युसम्भवम् इन्द्रपुत्रं वालिनमिव महास्त्रस्य ब्रह्मास्त्रस्य मोक्षेण त्यागेन विरोधिवीरं निशाचरेश्वरं रावणं मर्म्मणि वक्षसि निजघान आहतवान् ।

पक्षे अथार्ज्जुनोपदेशानन्तरं लसन् रणे शोभमानो भीमो वृकोदरः महायुधं महान्तं संग्रामं प्रवर्त्त्य कृत्वा पुरा त्रेतायां महास्त्रमोक्षेण ब्रह्मास्त्रक्षेपेण रामः शतस्य शतसंख्यजनस्येत्यर्थः मन्योः शोकस्य दैन्यस्य वा सम्भवो यस्मात् तम् । मन्युः पुमान् क्रुधि । शोके दैन्ये च यज्ञे चेति मेदिनी । निशाचरेश्वरं रावणमिव

पुराणभूपालपरम्पराणां
साम्राज्यलक्ष्मीहरकार्म्मणं सः ।
मणिप्रभाभासुरमध्यतिष्ठत्
सिंहासनं सूर्य्य इवोदयाद्रिम् ॥ ४९ ॥
मणिदर्पणमण्डले मनोज्ञे
परिफुल्ला विरराज तस्य मूर्त्तिः ।
सुधियां हृदयेषु तद्गुणौघः
ककुभां भित्तिषु पुण्यकीर्त्तिपूरः ॥ ५० ॥

जनानां प्रजानां पुण्यजः पुण्याज्जातः अपरः पारिजातइव देवतरुविशेष इव तत्रापि मुकुटाद्यलङ्काराणां सद्भावादियमुत्प्रेक्षा। अधिकं यथा तथा प्रेक्ष्यो दर्शनीय आसीत् स्वतः सुन्दरोऽपि नृपचिह्नमुकुटादिधारणादतिसुन्दरो बभूवेत्यर्थः । मालिनी ॥ ४८ ॥

पुराणेति । स रामः पक्षे युधिष्ठिरः उदयाद्रिं पूर्व्वपर्व्वतं सूर्य्यइव सिंहासनम् अध्यतिष्ठत् आरुरोह । यत्रार्थेऽधिष्ठादेरित्यधिकरणस्य कर्म्मत्वम्। किम्भूतं पुराणभूपालपरम्पराणां पूर्व्वाभिषिक्तनृपसमूहानां साम्राज्यलक्ष्म्याश्चक्रवर्त्तित्वशोभाया हरे हरणे। भावे डः। कार्म्मणं मन्त्रतन्त्रादिना वशीकरणकारणम् । कार्म्मणं मन्त्रतन्त्रादियोजने कर्म्मठेऽपि चेति विश्वः। साम्राज्यलक्ष्मीहरं यत् कार्म्मणं तद्रूपमिति वा। वरेति पाठे वरं श्रेष्ठं कार्म्मणमित्यर्थः तस्मिन् सिंहासनारूढे अन्येषां साम्राज्यभङ्गादिति भावः। तथा मणीनां प्रभाभिर्भासुरमुज्ज्वलम् । उपमा ॥ ४९ ॥

मणीति । तस्य रामस्य पक्षे युधिष्ठिरस्य परिफुल्ला अभिषेकालङ्करणादिना प्रफुल्ला मूर्त्तिर्देहः मनोज्ञे सुन्दरे मणिदर्पणमण्डले मणिमयादर्शाभ्यन्तरे विरराज प्रतिबिम्बितत्वेन शुशुभे। तथा तस्य गुणौघो गुणसमूहः सुधियां सुबुद्धिमतां हृदयेषु विरराज। तथा तस्य

ततेषु विज्ञैर्विततेषु कोविदै-
र्घनेषु दक्षैः शुषिरेषु सूरिभिः।
अवादि वाद्यं पुरतोऽस्य वादकै-
रमुक्तगीतैर्लयबन्धसुन्दरम् ॥ ५६ ॥

सकेतकदलं यथा चतुरनेत्रचारैः सदः
सपल्लवचयं यथा करतलाञ्चलैः शोभयन्।

तथा अशेषसङ्गीतकलासु सर्व्वसङ्गीतविद्यासु विचक्षणैः पण्डितैः। एतेनात्रानुक्तमपि सगर्भायाः सीतायाः परित्यागादिकमाकारदृष्ट्या बोध्यमिति सूचितम्।

पक्षे स युधिष्ठिरः कुशलैः कुशीलवैर्नटैः क्षणात् क्षणकालं प्राप्य नत्वनेकसमयं तस्याव्यसनित्वादिति भावः। भेजे किम्भूतैः अनुज्झितास्थानकगर्भम् अपरित्यक्तसभामध्यं यथा यथा सभामध्यं प्राप्येत्यर्थः आरात् समीपे ध्वनद्भिरानकैः पटहैः। आनकः पटहोऽस्त्री स्यादित्यमरः। नृपप्रबोधनार्थं तैर्वाद्यमानैः पटहैः कर्त्तृभिरित्यर्थः प्रथमं निवेदितैर्ज्ञापितैः। अन्यत्तुल्यम् ॥ ५५ ॥

ततेष्विति। अस्य रामस्य पक्षे युधिष्ठिरस्य पुरतोऽग्रे वादकैर्वाद्यकारकैर्जनैः वाद्यं चतुर्विधं वीणादिकम् अवादि वादितं किम्भूतैः ततेषु वीणादिषु विज्ञैर्निपुणैः विततेषु ततविपरीतेषु चतुर्विधवाद्यानां प्रक्रमात् आनद्धनामकमुरजादिष्वित्यर्थः कोविदैः पण्डितैः तथा घनेषु कांस्यतालादिषु दक्षैः कुशलैः तथा शुषिरेषु वंशादिषु सूरिभिः पण्डितैः। ततं वीणादिकं वाद्यमानद्धं मुरजादिकम्। वंशादिकन्तु शुषिरं कांस्यतालादिकं घनमित्यमरः। तथा लयो गानवाद्ययोः साम्यम्। लयः साम्यमित्यमरः। तस्य बन्धेनाश्रयणेन सुन्दरं यथा तथा अमुक्तानि अत्यक्तानि गीतानि यैस्ते तथा तैः गानमपि कुर्व्वद्भिरित्यर्थः ॥ ५६ ॥

सकेतकेति। निपुणो नृत्यप्रयोगकुशलो लासकस्त्रीगणो।

# शुद्धिपत्रम् ।

| पङ्‌ष्ठ | पङ्क्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| १३ | १९ | विन्ध | विन्धत्र |
| २१ | २३ | ताषां | तासां |
| २७ | ८ | करिस्यते | करिष्यते |
| २८ | २७ | यथेतिस्वरसात् | इतिदर्पणात् |
| ३४ | २७ | तिलकं | तिलका |
| ३५ | १८ | उपमीनोति | उपमिनोति |
| ४१ | १६ | भालूका | भालूका |
| ४७ | १ | भक्तत्रायत्त्या | भक्तत्रायसत्त्या |
| ६० | १८ | पुरोचनदत्तो | पुरोचनदाहाय स्वदत्तो |
| ६९ | २० | व्वांस | व्यास |
| ९२ | ३ | दुराणमं | दुरानमं |
| ९२ | २३ | दुराणमं | दुरानमं |
| ९२ | २४ | शाकं | साकं |
| ९३ | १ | शाकं | साकं |
| १०९ | ८ | आड़म्बरन्तु | आड़म्बरस्तु |
| १६५ | २० | चित्रा | स्फ़ुरन्तश्चित्रा |
| १८७ | २० | तव | रामस्य |
| २०७ | १३ | तुराषान्मेघ | तुराषाण्मेघ |
| २३५ | २१ | प्रतस्थे | प्रतस्थाते |
| २५३ | २७ | सहोत्क्तिमूला | सहोक्तिमूलं |

